अनुक्रमांक ........................ कोड नं० – S8SK802

# केन्द्रीय विद्यालय संगठन, पटना संभाग

# सत्रांत परीक्षा, 2018-19

कक्षा – अष्टमी (VIII)

संस्कृतम्

क्र. सं. 2518

समय – सार्द्धहोराद्वयम्] [पूर्णाङ्का – 80

---

छात्रस्य / छात्राया: नाम ..............................................................................

खण्ड ..................... अनुक्रमांक ............................. दिनांक ..............................

---

निर्देशा: –

सर्वे प्रश्ना: अनिवार्या: सन्ति ।

प्रश्नानाम् उत्तराणि निर्दिष्टस्थाने एव लेखनीयानि ।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

| | | | |
|---|---|---|---|
| खण्ड: (क) अपठितावबोधनम् | – | 10 | |
| खण्ड: (ख) रचनात्मककार्यम् | – | 15 | |
| खण्ड: (ग) अनुप्रयुक्तव्याकरणम् | – | 20 | |
| खण्ड: (घ) पठितावबोधनम् | – | 35 | |
| योग: | – | 80 | प्राप्ताङ्का: ................. |

वीक्षकस्य हस्ताक्षरम् परीक्षकस्य हस्ताक्षरम्

***Turn Over***

Scanned by CamScanner

## खण्ड-'क' अपठित अवबोधनम्

1. अधोलिखितानां गद्यांशं पठित्वा उत्तराणि लिखत -

एकस्मिन् ग्रामे एकः व्याधः वसति स्म । तस्य नाम भैरवः आसीत् । सः जीविकार्थं पशून् हत्वा नगरे विक्रीणाति स्म । एकदा आखेटाय वनम् अगच्छत् । तत्र तेन एकः मृगः दृष्टः । सः तं मृगम् अमारयत् । तदेव सः मार्गे एकं सिंहम् अपश्यत् । तं दृष्ट्वा सः अचिन्तयत् – "यदि एषः सिंहः अपि प्राप्तः भवेत् तर्हि अहं प्रभूतं धनं प्राप्स्यामि ।" लोभेन यावत् सः सिंहं प्रति शरम् अक्षिपत् तावत् एव सिंहः अपि व्याधम् अक्राम्यत् । तदा व्याधः पंचत्वं गतः ।

(i) एकपदेन उत्तरत – $1 \times 2 = 2$

(क) व्याधः कुत्र वसति स्म ? ..........................................

(ख) सः आखेटाय कुत्र अगच्छत् ? ..........................................

(ii) पूर्णवाक्येन उत्तरत - $2 \times 2 = 4$

(क) सिंहम् दृष्ट्वा व्याधः किम् अचिन्तयत् ?

..........................................................................................

(ख) सः जीविकार्थं किम् करोति स्म ?

..........................................................................................

(iii) निर्देशानुसारम् उत्तरत - $1 \times 4 = 4$

(क) 'एकस्मिन्' इति पदे का विभक्तिः ?

(अ) चतुर्थी (आ) तृतीया (इ) पञ्चमी (ई) सप्तमी

..........................................................

(ख) 'अचिन्तयत्' इति पदे कः लकारः ?

(अ) लट् लकारः (आ) लोट् लकारः (इ) लृट् लकारः (ई) लङ् लकारः

..........................................................

(ग) 'मृगः' इत्यस्य पदस्य विशेषणपदं किम् अस्ति ?

(अ) कृष्टः (आ) एकः (इ) तेन (ई) तत्र

..........................................................

Scanned by CamScanner

(घ) 'एकदा सः आखेटाय वनम् अगच्छत्' इति वाक्ये अव्यय पदम् अस्ति ?

(अ) आखेटाय (आ) सः (इ) एकदा (ई) अगच्छत्

..................................................

## खण्ड-'ख' रचनात्मकं लेखनम्

2. कोष्ठकान्तर्गतानां पदानाम् उपयुक्तं विभक्तिप्रयोगेन अनुच्छेदम् पूरयत – ½ × 10 = 5

एकः काकः 1. .................................. (आकाश) डयमानः आसीत् । तृषार्तः सः 2. ........................ (जल) अन्वेषणं करोति । तदा सः 3. ........................ (घट) अल्पं 4. ............................ (जल) पश्यति । सः 5. ............................ (उपल) आनीय 6. ........................ (घट) पातयति । जलं 7. ........................ (घट) उपरि आगच्छति । 8. ..................... (काक) सानन्दं 9. ........................ (जल) पीत्वा तृप्यति । अतः उच्यते - 10. ........................ (उद्यम) हि कार्याणि सिद्धयन्ति ।

3. चित्रम् दृष्ट्वा उपयुक्तं पदानि गृहीत्वा वाक्यपूर्तिं कुरुत- 2 × 5 = 10



(क) अस्मिन् चित्रे एका .......................................... वहति ।

(ख) नदी .......................................... निःसरति ।

(ग) नद्याः जलं .......................................... भवति ।

(घ) .......................................... शस्यसेचनं भवति ।

(ङ) भारतं .......................................... भूमिः अस्ति ।

Scanned by CamScanner

## खण्ड-'ग' अनुप्रयुक्त-व्याकरणम्

4. उदाहरणानुसारं कोष्ठकप्रदत्तेषु पदेषु चतुर्थी विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिम् कुरुत - ½ × 5 = 2½

यथा- भिक्षुकाय धनं ददातु । ( भिक्षुक )

( क ) ............................ पुस्तकं देहि । ( छात्र )

( ख ) अहम् ............................ वस्त्राणि ददामि । ( निर्धन )

( ग ) ............................ पठनम् रोचते । ( लता )

( घ ) रमेशः ............................ अलम् । ( सुरेश )

( ङ ) ............................ नमः । ( अध्यापक )

5. अधोलिखितपदेषु प्रकृति-प्रत्ययविभागं कुरुत- ½ × 5 = 2½

| पदानि | प्रकृतिः | | प्रत्ययः |
|---|---|---|---|
| ( क ) ज्ञातुम् | ................... | + | ............................ । |
| ( ख ) पातुम् | ................... | + | ............................ । |
| ( ग ) श्रोतुम् | ................... | + | ............................ । |
| ( घ ) गन्तुम् | ................... | + | ............................ । |
| ( ङ ) कर्तुम् | ................... | + | ............................ । |

6. उदाहरणमनुसृत्य निर्देशानुसारं लकारपरिवर्तनं कुरुत- ½ × 4 = 2

| वर्तमानकालः | अतीतकालः |
|---|---|
| यथा- सा शिक्षिका अस्ति । | सा शिक्षिका आसीत् । |
| ( क ) सा अध्यापने संलग्ना भवति । | ............................................................ । |
| ( ख ) सः त्रयोदशवर्षकल्पः अस्ति । | ............................................................ । |
| ( ग ) महिलाः तडागात् जलं नयन्ति । | ............................................................ । |
| ( घ ) यूयं किं विद्यालयं गच्छथ ? | ............................................................ । |

Scanned by CamScanner

7. मञ्जूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत- ½ × 4 = 2

| सन्ति, वर्तते, इच्छामि, निवसन्ति |
|---|

(क) अयं प्रयोगः प्रतीकात्मकः ............................................... ।

(ख) सप्त केन्द्रशासितप्रदेशाः ............................................... ।

(ग) अत्र बहवः जनजातीयाः ............................................... ।

(घ) अहम् किमपि श्रोतुम् ............................................... ।

8. मञ्जूषातः चित्वा उचिताव्ययेन वाक्यपूर्तिं कुरुत- ½ × 6 = 3

| तावत्, अपि, एव, यथा, नित्यम्, यादृशं |
|---|

(क) तयोः .............................. प्रियं कुर्यात् ।

(ख) .............................. कर्मं करिष्यसि । तादृशं फलं प्राप्स्यसि ।

(ग) वर्षशतैः .............................. निष्कृतिः न कर्तुं शक्या ।

(घ) तेषु .............................. त्रिषु तुष्टेषु तपः समाप्यते ।

(ङ) .............................. राजा तथा प्रजा ।

(च) यावत् सफलः न भवति .............................. परिश्रमं कुरु ।

9. अधोलिखिते सन्धिविच्छेदे रिक्त स्थानानि पूरयत - 1 × 5 = 5

**यथा** - नोक्तवती = न + उक्तवती

(क) सहसैव = सहसा + ..................

(ख) परामर्शानुसारम् = .................. + अनुसारम्

(ग) वधार्हा = .................. + अर्हा

(घ) अधुनैव = अधुना + ..................

(ङ) प्रवृत्तोऽपि = प्रवृत्तः + ..................

10. मञ्जूषातः अङ्कानां कृते पदानि लिखत - ½ × 6 = 3

| षण्णवतिः, चतुःपञ्चाशत्, द्वासप्ततिः, अशीतिः, पञ्चषष्टिः, चतुर्नवति |
|---|

80 = .............................................. ।   54 = .............................................. ।

96 = .............................................. ।   72 = .............................................. ।

94 = .............................................. ।   65 = .............................................. ।

Scanned by CamScanner

## खण्ड–'घ' पठित अवबोधनम्

11. पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

सीमन्तिनीषु का शान्ता ?
राजा कोऽभूत् गुणोत्तमः ?
विद्वद्भिः का सदा वन्द्या ?
अत्रैवोक्तं न बुध्यते ।

(i) एकपदेन उत्तरत – 1 × 2 = 2

(क) गुणोत्तमः राजा कः अभवत् ? ..............................

(ख) सीमन्तिनीषु का शान्ता ? ..............................

(ii) पूर्णवाक्येन उत्तरत – विद्वद्भिः का सदा वन्द्या ? 2

.................................................................................................. ।

(iii) भाषिककार्यम् – 1 × 2 = 2

(क) 'राजा कोऽभूत् गुणोत्तमः ?' इति श्लोकांशे किं विशेषणपदम् ? ..................

(अ) राजा (ब) कः (स) अभूत् (द) गुणोत्तमः

(ख) 'गुणोत्तमः' इति पदस्य संधि-विच्छेदं क्रियताम् – ..................

(अ) गुणो + उत्तमः (ब) गुणो + त्तमः (स) गुण + उत्तमः (द) गु + णोत्तमः

12. अधोलिखितानां गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके । परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशीलः इति । सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः । सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः, स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः । पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा ।

(i) एकपदेन उत्तरत– 1 × 4 = 4

(क) सूर्यः कस्यां दिशायाम् उदेति ? ..............................

(ख) महान् गणितज्ञः ज्योतिर्विद् च कः आसीत् ? ..............................

(ग) कः अचलः अस्ति ? ..............................

(घ) स्वकीये अक्षे का घूर्णति ? ..............................

Scanned by CamScanner

(ii) पूर्णवाक्येन उत्तरत – 2 × 2 = 4

(क) का प्रचलिता रूढिः आर्यभटेन प्रत्यादिष्टा ?

........................................................................................................................ ।

(ख) कः सिद्धान्तः सर्वप्रथमं तेन प्रवर्तितः ?

........................................................................................................................ ।

(iii) भाषिक-कार्यम् – 1 × 4 = 4

(क) 'पृथिवी स्थिरा वर्तते' इति वाक्ये अत्र किं विशेषणपदं प्रयुक्तम् ? ................

(अ) पृथिवी (ब) स्थिरा (स) वर्तते (द) अत्र

(ख) 'सुस्थापितः' इति पदस्य कः उपसर्गः अस्ति ? ................

(अ) स्थापितः (ब) थापितः (स) सु (द) सुस्

(ग) 'पूर्वदिशायां' इति पदस्य अत्र किं विलोमपदं अस्ति ? ................

(अ) पश्चिमदिशायां (ब) उदेति (स) सूर्यः (द) गच्छति

(घ) 'अवबोध्यमस्ति' इति संयुक्तस्य पदस्य विच्छेदं कुरुत ।

............................ + ............................ ।

13. श्लोकांशमेलनं कृत्वा लिखत – 1 × 4 = 4

| क | ख |
|---|---|
| किं कुर्यात् कातरो युद्धे | अत्रैवोक्तं न बुध्यते |
| विद्वद्भिः का सदा वन्द्या | तक्रं शक्रस्य दुर्लभम् |
| कं संजघान कृष्णः | मृगात् सिंहः पलायते |
| कथं विष्णुपदं प्रोक्तं | काशीतलवाहिनी गङ्गा |

(क) ........................................................................................................

(ख) ........................................................................................................

(ग) ........................................................................................................

(घ) ........................................................................................................

14. रेखांकितपदमाधृत्य प्रश्ननिर्माणम् कुरुत– 1 × 5 = 5

(क) <u>प्रसन्नतायाः</u> विषयोऽयम् । ................................................................ ?

Scanned by CamScanner

( ख ) सर्वकारस्य घोषणा अस्ति । .................................................................. ?

( ग ) अहम् स्वापराधं स्वीकरोमि । .................................................................. ?

( घ ) समयात् पूर्वम् आया सं करोषि । .................................................................. ?

( ङ ) अम्बिका क्रोडे उपविशति । .................................................................. ?

15. समानार्थकपदानि मेलनं कृत्वा लिखत – ½ × 6 = 3

| | | | |
|---|---|---|---|
| जगति | नदी | ...................... | ...................... |
| कुलिशात् | पृथ्वीम् | ...................... | ...................... |
| प्रकृति | संसारे | ...................... | ...................... |
| चक्षुषा | स्वभावः | ...................... | ...................... |
| तटिनी | वज्रात् | ...................... | ...................... |
| वसुन्धरा | नेत्रेण | ...................... | ...................... |

16. 'क' स्तम्भे विशेषणपदं दत्तम् 'ख' स्तम्भे च विषेष्यपदम् । तयोर्मेलनम् कृत्वा लिखत – ½ × 5 = 2½

| 'क' स्तम्भ | 'ख' स्तम्भ | 'क' स्तम्भ | 'ख' स्तम्भ |
|---|---|---|---|
| ( 1 ) स्वस्था | ( क ) कृत्यम् | ( 1 ) स्वस्था | ...................... |
| ( 2 ) महत्वपूर्णा | ( ख ) पुत्री | ( 2 ) महत्वपूर्णा | ...................... |
| ( 3 ) जघन्यम् | ( ग ) वृत्तिः | ( 3 ) जघन्यम् | ...................... |
| ( 4 ) क्रीडन्ती | ( घ ) मनोदशा | ( 4 ) क्रीडन्ती | ...................... |
| ( 5 ) कुत्सिता | ( ङ ) गोष्ठी | ( 5 ) कुत्सिता | ...................... |

17. उचितकथनानां समक्षं 'आम्' अनुचितकथनानां समक्षं 'न' च इति लिखत- ½ × 5 = 2½

( क ) अहम् परिवारस्य चक्षुषा संसारं पश्यामि । ......................

( ख ) समं जगत् मम काव्यैः मुग्धमस्ति । ......................

( ग ) अहम् अविवेका भारतजनता अस्मि । ......................

( घ ) अहं वसुन्धराम् कुटुम्बं न मन्ये । ......................

( ङ ) अहं विज्ञानधना ज्ञानधना चास्मि । ......................

* * *

Scanned by CamScanner